
ACC NO 2042
Date



षोषशः पाठः

# कन्यायाः पतिनिर्णयः



कस्मिंश्चित् ग्रामे कश्चन पण्डितः निवसति स्म। तस्मिन् ग्रामे सः सर्वमान्यः आसीत्। तस्य एका सर्वगुणसम्पन्ना कन्या आसीत्। आशैशवात् अतीव स्नेहसमादरसहिततया सा वर्धिता आसीत्। क्रमशः तस्याः वयोवृद्धिः अभवत्। तस्याः परिणयार्थं बहवः प्रस्तावाः आगताः। किन्तु उच्चाकाङ्क्षिणी सा कन्या प्रतिज्ञाबद्धा आसीत् यत् सर्वे यं प्रशंसन्ति यश्च शक्तिशाली भवति, तमेव अहं वृणोमि इति।

एकदा तस्य राज्यस्य महाराजः हस्तिपृष्ठं समारुह्य तद्ग्रामाभ्यन्तरं समागतः। पण्डितस्य कन्या राजानम् अपश्यत्। समीपस्थाः सर्वे ग्रामवासिनः तत्र आगत्य राजानं नमस्कृतवन्तः।

उच्चाकाङ्क्षिणी सा कन्या ज्ञातवती यद् राजा एव महाशक्तिशाली न्यायवांश्च इति। अत: सा मनसि एव तं पतिम् अचिन्तयत्।

यदा महाराज: स्वकर्तव्यं समाप्य हस्तिपृष्ठं समारुह्य राजधानीं प्रत्यगच्छत् तदा कन्या अपि तम् अनुसृत्य गतवती। पथि महाराज: स्वस्य गुरुम् अपश्यत्। स: गुरु: साधुवेषधारी आसीत्। तं दृष्ट्वा राजा सहसा हस्तिपृष्ठाद् अवतीर्य सद्गुरो: चरणस्पर्शम् अकरोत्। पण्डितस्य कन्या एतत् दृष्ट्वा अचिन्तयत् यद् वस्तुत: राजा नैव सर्वश्रेष्ठव्यक्ति: तदपेक्षया तस्य गुरु: एव श्रेष्ठ: अस्ति, य: साधुवेषधारी इति। अत: सा राजानं विहाय साधो: अनुसरणं कुर्वती वनं गतवती। किञ्चिदूरं गतौ तौ शिवमन्दिरम् एकं प्रविष्टवन्तौ। तत्र महादेवस्य मूर्ते: पुरत: साधुगुरु: दण्डवत् प्रणामम् अकरोत्। पण्डितकन्या एतद् दृष्ट्वा चिन्तितवती यत् साधोरपि परतर: अस्ति देवाधिदेव: अयं महादेव: शिव: इति।

अत: सा महादेवमेव पतिं भावयन्ती तस्मिन् एव मन्दिरे वासं कृतवती। किञ्चित्कालानन्तरं कश्चन कुकुर: तत् मन्दिरम् आगत्य महादेवस्य पुरत: स्थापितं नैवेद्यं तस्य पार्श्वस्थं प्रसादं च खादितवान्।

एतत् दृष्ट्वा पण्डितस्य कन्या अचितन्तयत् यत् एष: कुक्कुर: एव महादेवात् अपि श्रेष्ठ:, भगवत: महोदवस्य विषये अन्य: को वा एतादृशं व्यवहारं कर्तुं समर्थ: स्यात् इति। अत: सा मन्दिरवासं परित्यज्य तं कुक्कुरं अनुसृतवती। स: कुक्कुर: तु धावन् गत्वा कस्यचिद् ग्रामस्य पण्डितस्य गृहं प्रविष्टवान्। पण्डितस्य सुकुमार: तरुण: पुत्र: गृहस्य पुरत: पीठस्य उपरि उपविश्य चिन्तारत: आसीत्। कुक्कुर: तस्य पार्श्वं गत्वा सस्नेहं तस्य पादलेहनम् आरब्धवान् एतद् दृष्ट्वा पण्डितस्य पुत्री चिन्तितवती यत् पण्डितस्य युवकपुत्र: एव एतावता मया दृष्टेभ्य: सर्वेभ्य: अपि श्रेष्ठ:। अत: एष: एव मम पति भवितुं योग्य: अस्ति इति।

अन्ततोगत्वा पण्डितस्य पुत्रेण सह तस्या: पण्डितकन्याया: परिणय: अभवत्। एवम् उच्चाकाङ्क्षिण्या: तस्या: कन्याया: मनस: इच्छा परिपूर्णतां गता। सा सुखेन दीर्घकालं यावत् जीवनम् अयापयत्।

## अभ्यास:

1. अनया कथया क: सन्देश: प्राप्यते?
2. पण्डितकन्या अन्तत: कं पतिरूपेण स्वीकृतवती?
3. सा कन्या कीदृशी आसीत्?